BARASAT GOVT COLLEGE LIBRARY 10 K.N.C Road, Barasat, Kol-124

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2022-23

## SANACOR05T-SANSKRIT (CC5)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतमेकस्य प्रश्नस्य उत्तरं देयम्। 10×1 = 10

(क) भासकृतस्य 'स्वप्नवासवदत्तम्' इति नाटकस्य प्रथमाङ्के वर्णितस्य ब्रह्मचारि – वृत्तान्तस्य उपयोगो लिख्यताम्।

(ख) भासविरचितस्य 'स्वप्नवासवदत्तम्' इति नाटकस्य नामकरणस्य यौक्तिकता विशदीक्रियताम्।

2. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यानं विधीयताम्। 5×1 = 5

(क) गुणानां वा विशालानां सत्काराणाञ्च नित्यशः।
कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः॥

(ख) प्रद्वेषो बहुमानो वा संकल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता॥

3. अधोलिखितानां यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) 'दुःखं न्यासस्य रक्षणम्'– कस्मिन् अङ्के कस्य वचनमिदम् ?

(ख) को यौगन्धरायणः ? स्वप्नवासवदत्तनाटके कस्मिन् कस्मिन् अङ्के स दृश्यते ?

(ग) 'स्वप्नवासवदत्तम्' इति नाटकस्य रचयिता कः ? नाटके कति अङ्काः सन्ति ?

(घ) पद्मावती का ? कथं सा तपोवनमगच्छत् ?

(ङ) उदयनस्य वीणायाः नाम किम् ? कस्मात् स तां प्राप्तवान् ?

(च) महासेनः क आसीत् ? कथं स महासेन इति कथितः ?

(छ) भासस्य अपरं कृतिद्वयं लेख्यम्।

(ज) का च वसुन्धरा ? का नाम अङ्गारवती ?

BARASAT GOVT COLLEGE LIBRARY

## SECTION-B

4. यथाभिमतमेकस्य प्रश्नस्य उत्तरं संस्कृतेन देवनागरीलिप्या च देयम्। 10×1 = 10

(क) शकुन्तलायाः पतिगृहयात्रायाः वर्णनं विधीयताम्। 10

(ख) "उपमा कालिदासस्य"– इत्युक्तिः अभिज्ञानशकुन्तलमाश्रित्य सोदाहरणं विशद्यताम्। 10

(ग) हंसपदिका का ? नाटकस्य कस्मिन् अङ्के तस्या गीतं वर्तते ? सङ्गीतस्य नाटकीयतात्पर्यं विचार्यताम्। 1+1+8

5. यथेच्छं त्रयाणां श्लोकानां संस्कृतेन देवनागरीलिप्या च व्याख्यानं विधीयताम्। 5×3 = 15

(क) शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो जनस्य।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥

(ख) स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत् फलमेव पुण्यम्।
असन्निवृत्त्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः॥

(ग) शान्तमिदमाश्रमपदं स्फुरति च वाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र॥

(घ) अनाघ्रातं पुष्पं किसलयमलूनं कररुहै–
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥

(ङ) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि॥

अथवा

अधोलिखितेषु यथेच्छं त्रयाणां टिप्पणी संस्कृतेन देवनागरीलिप्या च लेख्या। 5×3 = 15

(क) कुलपतिः, (ख) धनमित्रः, (ग) विष्कम्भकः, (घ) सूत्रधारः, (ङ) गौतमी

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K.N.C Road, Barasat, Kol-124"

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2022-23

## SANACOR06T-SANSKRIT (CC6)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु <u>यथेच्छमेकः</u> प्रश्नः समाधेयः। 10×1 = 10

(क) 'सर्गबन्धो महाकाव्यम्'– इति साहित्यदर्पणानुसारं महाकाव्यस्य लक्षणं सविस्तरमालोच्यताम्।

(ख) गद्यकाव्यस्य लक्षणं किम् ? गद्यकाव्यस्य भेदानुसारेण स्वरूपं वर्णनीयम्।

(ग) श्रव्यकाव्यस्य स्वरूपं किम् ? सोदाहरणं व्याख्यायताम्।

### SECTION-B

2. अधोलिखितेषु प्रश्नेषु <u>यथेच्छमेकः</u> संस्कृतभाषया देवनागरीलिप्या च समाधेयः। 10×1 = 10

(क) का नाम व्यञ्जना ? काव्यप्रकाशानुसारं सोदाहरणं व्याख्यायताम्।

(ख) उत्पत्तिवादस्य प्रवर्तकः कः ? काव्यप्रकाशानुसारं रसोत्पत्तिवादः व्याख्यायताम्।

(ग) कः भक्तिवादस्य प्रवर्तकः ? काव्यप्रकाशानुसारं भक्तिवादः व्याख्यायताम्।

### SECTION-C

3. अधोलिखितेषु प्रश्नेषु यथेच्छं <u>पञ्च</u> प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) रूपकालंकारस्य लक्षणं किम् ? अस्य उदाहरणं लेख्यम्।

(ख) आर्याछन्दः कीदृशम् अस्ति ? आर्याः छन्दःशास्त्रे कतिप्रकाराः ?

(ग) मन्दाक्रान्ताछन्दसः लक्षणं किम् ? 'रस' इत्यतेन किं बोध्यते ?

(घ) यमकं कीदृशोऽलङ्कारः ? अस्य एकम् उदाहरणं प्रदीयताम्।

(ङ) 'क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः'– अत्र कोऽलङ्कारः अस्ति ? अस्य अलंकारस्य लक्षणं संक्षेपतो लिखत।

(च) उत्प्रेक्षालंकारस्य लक्षणं किम् ? एकम् उदाहरणं प्रदीयताम्।

(छ) 'त्रिमुनि' इति पदस्य उल्लेखः कस्मिन् छन्दसि वर्तते ? तस्य छन्दसः लक्षणमुल्लिख्यताम्।

BARASAT GOVT COLLEGE LIBRARY

4. अधोधृतेषु विषयेषु यथेच्छं <u>चतुर्णां</u> टिप्पणी संस्कृतभाषया देवनागरीलिप्या च विधेया।

(क) समासोक्तिरलंकारः।

(ख) मालिनीवृत्ते 'भोगिलीकैः'।

(ग) दृष्टान्तालंकारः।

(घ) निदर्शनालंकारः।

(ङ) अपह्नुतिरलंकारः।

(च) शार्दूलविक्रीडितच्छन्दः।

(छ) गणाः।

(ज) वसन्ततिलकंछन्दः।

(झ) 'अध्यवसायः'।

——×——

BARASAT GOVT COLLEGE LIBRARY 10 K.N.C Road, Barasat, Kol-124

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2022-23

## SANACOR07T-SANSKRIT (CC7)

Time Allotted: 2 Hours

Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः

1. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतेन देवनागरलिप्या च लघुप्रबन्धो विरच्यताम्। 5×1 = 5

(क) धर्मशास्त्रेषु मानवानां साधारणधर्मविषयः निरूप्यताम्।

(ख) सूत्रसाहित्येषु प्रतिबिम्बिता समाजव्यवस्था।

अथवा

अधोलिखितेषु श्लोकेषु यथेच्छमेकः संस्कृतेन देवनागरलिप्या च व्याख्येयः। 5×1 = 5

(क) वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्॥

(ख) ब्राह्मण्यक्षत्रियविशां शूद्राणाञ्च परन्तपः।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥

2. अधः प्रदत्तेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) मनोः नये धर्मस्य किं लक्षणम् ? कति च स्थानानि सन्ति ?

(ख) याज्ञवल्क्यनये किं धर्ममूलम् ?

(ग) सूत्रसाहित्यं कतिविधम् ? कानि च तानि ?

(घ) समाजस्य लक्षणं किम् ?

(ङ) कस्तावत् आश्रमधर्मः ?

(च) अस्तेयं नाम किम् ? को नाम 'दमः' ?

(छ) को निमित्तधर्मः ? को वा साधारणधर्मः ?

### ख-विभागः

3. यथेच्छमेकः प्रश्नः संस्कृतेन देवनागरलिप्या च समाधेयः। 10×1 = 10

(क) प्राचीनभारतवर्षस्य आश्रमचतुष्टयमाश्रित्य एकः लघुबन्धः विरच्यताम्।

(ख) महाभारतस्य शान्तिपर्वणि वर्णसंकरजातानाम् अनार्यजातीनां यद् वर्णनं कृतं तत् समासेन वर्ण्यताम्।

BARASAT GOVT COLLEGE LIBRARY

4. प्रसङ्गोल्लेखपूर्वकं यथेच्छमेकस्य संस्कृतेन देवनागरलिप्या च व्याख्या कार्या। 5×1 = 5

(क) रत्नानि विभूषयन्ति योषा भूष्यन्ते वनिता न रत्नकान्त्या।
चेतो वनिता हरन्त्यरत्ना नो रत्नानि विनाङ्गनाङ्गसंगम्॥

(ख) अहिंसा सत्यमक्रोधो वृत्तिदायानुपालनम्।
भरणं पुत्रदाराणां शौचमद्रोह एव च॥

अथवा

अधोलिखितेषु यथेच्छमेकमाश्रित्य टिप्पणी लेख्या। 5×1 = 5

(क) त्रिवर्गः, (ख) पुरुषार्थः, (ग) जीवन्मुक्तिः।

## ग-विभागः

5. यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) अथर्ववेदीयसभाविषयकं सूक्तमवलम्ब्य वैदिकयुगे सभायाः स्वरूपम् लिखत।

(ख) शुक्रनीत्यनुसारेण नीतिशास्त्रस्य श्रेष्ठत्वं प्रतिपाद्यताम्।

6. यथेच्छं द्वितयस्य संस्कृतेन देवनागरलिप्या च टीकां लिखत। 5×2 = 10

(क) विदथः, (ख) विशः, (ग) जनपदः, (घ) रत्नी।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छं द्वयं प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्येयम्। 5×2 = 10

(क) कार्य्यं सोऽवेक्ष्य शक्तिञ्च देशकालौ च तत्त्वतः।
कुरुते धर्मसिद्ध्यर्थं विश्वरूपं पुनः पुनः॥

(ख) अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः॥

(ग) सत्याग्रही सत्यपरः परेषां
दुःखानि सञ्चिन्तयन्ति प्रबुद्धः।
शान्तः सदा चैव मृदु रिपुभ्यो
नान्यायकार्यं सहते तु तेषाम्॥

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

लक्ष्यं सिद्धमानम्

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2021-22

## SANACOR05T-SANSKRIT (CC5)

## CLASSICAL SANSKRIT LITERATURE (DRAMA)

Time Allotted: 2 Hours　　　　Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतमेकस्य प्रश्नस्य उत्तरं देयम्।　　$10\times1 = 10$

(क) भासप्रणीते स्वप्नवासवदत्तनाटके स्वप्नदृश्यस्य तात्पर्यं व्याख्यायताम्।

(ख) स्वप्नवासवदत्तनाटकानुरोधेन राज्ञ उदयनस्य चरित्रं विश्लेषणीयम्।

2. अधोनिर्दिष्टयोरन्यतरस्य संस्कृतेन देवनागरीलिप्या च व्याख्यानं विधीयताम्।　　$5\times1 = 5$

(क) कालक्रमेण जगतः परिवर्त्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः॥

(ख) इयं बाला नवोद्वाहा सत्यं श्रुत्वा व्यथां व्रजेत्।
कामं धीरस्वभावेयं स्त्रीस्वभावस्तु कातरः॥

3. अधोलिखितानां यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः।　　$2\times5 = 10$

(क) स्वप्नवासवदत्तनाटके कति अङ्काः विद्यन्ते ? तत्र ब्रह्मचारिवृत्तान्तः कुत्र अङ्के विद्यते ?

(ख) राज्ञ उदयनस्य मन्त्रिणौ कौ आस्ताम् ?

(ग) ''परस्परगता लोके दृश्यते रूपतुल्यता''— इत्यत्र कः कस्य रूपतुल्यतां विवक्षति ?

(घ) ''प्रद्वेषो बहुमानो वा संकल्पादुपजायते''— अत्र रेखाङ्कितपदे सकारणं विभक्तिनिर्देशः करणीयः।

(ङ) कः महासेनः ? केन कारणेन स तथा उच्यते ?

(च) को नाम न्यासः ? स्वप्नवासवदत्तनाटके न्यासत्वेन कस्य चरित्रस्य उल्लेखः अस्ति ?

(छ) वासवदत्ता-पद्मावत्योः चारित्रिकवैशिष्ट्यगतः द्विविधः भेदः लेख्यः।

BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

## SECTION-B

4. यथाभिमतमेकस्य प्रश्नस्य उत्तरं संस्कृतेन देवनागरीलिप्या च देयम्। 10×1 = 10

(क) अभिज्ञानशकुन्तलनाटके दुर्वाससः अभिशापवृत्तान्तस्य तात्पर्यं विवृणुत।

(ख) अनसूयाप्रियंवदयोः चरित्रयोः तुलना विधीयताम्।

(ग) प्रथमाङ्कमनुसृत्य हस्तिवृत्तान्तः सतात्पर्यमालोच्यताम्।

5. यथेच्छं त्रयाणां श्लोकानां संस्कृतेन देवनागरीलिप्या च व्याख्यानं विधीयताम्। 5×3 = 15

(क) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

(ख) क्व वयं क्व परोक्षमन्मथो मृगशावैः सममेधितो जनः।
परिहासविजल्पितं सखे परमार्थेन न गृह्यतां वचः॥

(ग) अर्थो हि कन्या परकीय एव तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा॥

(घ) शमप्रधानेषु तपोधनेषु गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्तस्तदन्यतेजो'भिभवाद्वमन्ति॥

(ङ) मानुषीषु कथं वा स्यादस्य रूपस्य सम्भवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

अथवा

अधोलिखितेषु यथेच्छं त्रयाणां टिप्पणी संस्कृतेन देवनागरीलिप्या च लेख्या। 5×3 = 15

(क) नान्दी

(ख) गान्धर्वविधिः

(ग) अभिज्ञानम्

(घ) विदूषकः

(ङ) हंसपदिका

(च) शार्ङ्गरवः

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2021-22

## SANACOR06T-SANSKRIT (CC6)

## POETICS AND LITERARY CRITICISM

Time Allotted: 2 Hours                                                                 Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. अधोलिखितेषु यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) साहित्यदर्पणानुसारं काव्यस्य कति भेदाः सन्ति ? तत्र दृश्यकाव्यस्य स्वरूपं वर्णनीयम्।

(ख) किं खण्डकाव्यस्य लक्षणम् ? यथेच्छमेकमुदाहरणं प्रदाय तत्र लक्षणसंगतिः प्रदर्शनीया।

(ग) किं नाम चम्पूकाव्यम् ? सोदाहरणं व्याख्यायताम्।

### SECTION-B

2. अधोधृतेषु प्रश्नेषु यथेच्छमेकः संस्कृतभाषया देवनागरीलिप्या च समाधेयः। 10×1 = 10

(क) का नाम लक्षणा ? काव्यप्रकाशानुसारं शुद्धलक्षणायाः भेदं सोदाहरणं समासेन विवृणुत।

(ख) कः रसानुमितिवादस्य प्रवर्तकः ? काव्यप्रकाशानुसारं रसानुमितिवादः व्याख्यायताम्।

(ग) कः रसाभिव्यक्तिवादस्य प्रवर्तकः ? काव्यप्रकाशानुसारं रसाभिव्यक्तिवादः व्याख्यायताम्।

### SECTION-C

3. अधोधृतेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) अलंकारलक्षणं संक्षेपतो लिखत।

(ख) श्लेषालंकारस्वरूपं सामान्यतो विवृणुत।

(ग) अनुप्रासालंकारस्य किञ्चिदुदाहरणं प्रदीयताम्।

(घ) का नाम यतिः ?

(ङ) शिखरिणीछन्दसि कुत्र कुत्र यतिः भवति ?

(च) छन्दः कतिविधमस्ति ?

(छ) कीदृशः स्वरो दीर्घो भवति ?

BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

4. अधोधृतेषु यथेच्छं <u>चतुर्णां</u> टिप्पणी संस्कृतभाषया देवनागरीलिप्या च विधेया। 5×4 = 20

(क) इन्द्रवज्रा, (ख) मन्दाक्रान्ता, (ग) मालिनी, (घ) द्रुतविलम्बितम्, (ङ) अर्थान्तरन्यासः, (च) उपमा, (छ) काव्यलिङ्गम्, (ज) दीपकतुल्ययोगितयोः भेदः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K.N.C Road, Barasat, Kol-124"

लक्ष्यं सिद्धमानम्

**WEST BENGAL STATE UNIVERSITY**

B.A. Honours 3rd Semester Examination, 2021-22

# SANACOR07T-SANSKRIT (CC7)

## INDIAN SOCIAL INSTITUTIONS AND POLITY

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः

1. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतेन देवनागरलिप्या च लघुप्रबन्धो विरच्यताम्। 5×1 = 5

(क) वर्तमानसमाजव्यवस्थायाः सर्वेषु एव क्षेत्रेषु उन्नत्यर्थं प्राचीनधर्मशास्त्रस्य किं तात्पर्यम् ?

(ख) समाजे बौद्धधर्मस्य कथं सुप्रभावः परिलक्ष्यते ? किमस्ति बौद्धधर्मस्य अन्येभ्यो धर्मेभ्यो वैशिष्ट्यम् तदालोच्यम्।

अथवा

अधोलिखितेषु श्लोकेषु यथेच्छमेकः संस्कृतेन देवनागरलिप्या च व्याख्येयः। 5×1 = 5

(क) श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥

(ख) धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥

2. अधः प्रदत्तेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) याज्ञवल्क्यनये किं धर्मलक्षणम् ?

(ख) मनुना यो धर्मः परिकीर्तितः तत्सर्वं कुत्र अभिहितम् ?

(ग) पुराणस्य पञ्चलक्षणानि कानि ?

(घ) धर्मशब्दस्य व्युत्पत्तिगतः कः अर्थः ?

(ङ) कति वेदाङ्गानि ? तानि वेदपुरुषस्य केन केनाङ्गेन तुलितानि ?

(च) मिताक्षरा केन विरचिता ? मन्वर्थमुक्तावली केन विरचिता ?

(छ) महाभारतस्य रचयिता कः ? अस्मिन् ग्रन्थे कति पर्वाणि सन्ति ?

### ख-विभागः

3. यथेच्छमेकः प्रश्नः संस्कृतेन देवनागरलिप्या च समाधेयः। 10×1 = 10

(क) ऋग्वदीयपुरुषसूक्तं तथा महाभारतस्य स्त्रीपर्व समाश्रित्य चतुर्वर्णव्यवस्थाविषये प्रबन्धः रचनीयः।

(ख) आ-वैदिकयुगात् समाजे नारीणाम् अवस्थितिः वर्णनीया।

BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

4. प्रसङ्गोल्लेखपूर्वकं यथेच्छमेकस्य संस्कृतेन देवनागरलिप्या च व्याख्या कार्या। 5×1 = 5

(क) जात्युत्कर्षो युगे ज्ञेयः सप्तमे पञ्चमेऽपि वा।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम्॥

(ख) शूद्रायां ब्राह्मणाज्जातः श्रेयसा चेत्प्रजायते।
अश्रेयान्श्रेयसीं जातिं गच्छत्या-सप्तमाद्युगात्॥

अथवा

अधोलिखितेषु यथेच्छमेकमाश्रित्य टिप्पनी लेख्या। 5×1 = 5

(क) शूद्रः, (ख) अन्नप्राशनसंस्कारः, (ग) मोक्षः।

## ग-विभागः

5. यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) वैदिकरीतिं समाश्रित्य राज्ञः अभिषेकः वर्णनीयः।

(ख) राजकार्यावेक्षणे सप्ताङ्गतत्त्वस्य गुरुत्वं वर्णनीयम्।

6. यथेच्छं द्वितयस्य संस्कृतेन देवनागरलिप्या च टीकां लिखत। 5×2 = 10

(क) राजधर्मः, (ख) सत्याग्रहः, (ग) विग्रहः, (घ) आसनम्।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छं द्वयं प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्येयम्। 5×2 = 10

(क) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति॥

(ख) अपध्यानमलो धर्मो मलोऽर्थस्य निगूहनम्।
सम्प्रमोदमलः कामो भूयः स्वगुणवर्जितः॥

(ग) श्रेष्ठा बुद्धिस्त्रिवर्गस्य यदयं प्राप्नुयान्नरः।
कर्मणा बुद्धिपूर्वेण भवत्यर्थो न वा पुनः॥

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2020, held in 2021

## SANACOR05T-SANSKRIT (CC5)

Time Allotted: 2 Hours    Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतं प्रश्नस्य एकस्योत्तरं लेख्यम्। 10

(क) भासकृतस्य 'स्वप्नवासवदत्तमि'ति नाटकस्य प्रथमाङ्के वर्णितस्य ब्रह्मचारि– वृत्तान्तस्य उपयोगो लिख्यताम्।

(ख) पद्मावतीवासवदत्तयोः चरित्रयोः तुलनात्मिका आलोचना कर्तव्या।

2. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत – 5

(क) प्रद्वेषो बहुमानो वा संकल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता॥

(ख) यदि तावदयं स्वप्नो धन्यमप्रतिबोधनम्।
अथायं विभ्रमो वा स्यात् विभ्रमो ह्यस्तु मे चिरम्॥

3. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेया। 2×5 = 10

(क) 'स्वप्नवासवदत्तम्' इति ग्रन्थः संस्कृतसाहित्यस्य कस्यां श्रेण्यामन्तर्भूतः ? तत्र कति अङ्काः सन्ति ?

(ख) 'स्वप्नवासवदत्तम्' इति नाटकस्य नायिकानायकौ कौ स्तः ? अत्र विदूषकस्य नाम किम् ?

(ग) 'स्वप्नवासवदत्तम्' इति पदस्य व्युत्पत्तिः का ?

(घ) राजा उदयनो घोषवतीति वीणां कस्यै दत्तवान् ? तस्या वीणाया वैशिष्ट्यं किमासीत् ?

(ङ) विदूषकात् पद्मावत्याः शिरःपीडायाः संवादं ज्ञात्वा राज्ञ उदयनस्य मनसि कीदृशी प्रतिक्रिया सञ्जाता ?

(च) पद्मावती का ? कथं सा तपोवनमगच्छत् ?

(छ) यौगन्धरायणः कस्याः हस्ते कां न्यासरूपेण दत्तवान्।

### SECTION-B

4. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम्। 10

(क) 'अभिज्ञानशकुन्तलम्' इति नाटकस्य पञ्चमाङ्के हंसपदिकायाः सङ्गीतस्य नाटकीयतात्पर्यं विचार्यताम्।

BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

(ख) कर्तव्यनिष्ठनृपरूपेण, आदर्शप्रेमिकरूपेण, मातृभक्तपुत्ररूपेण सन्तानवत्सल– पितृरूपेण च दुष्यन्तस्य चरित्रवैशिष्ट्यं पर्यालोच्यताम्।

5. अधोलिखितेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागरीलिप्या च व्याख्या कार्या। 5×3 = 15

(क) शान्तमिदमाश्रमपदं स्फुरति च वाहुः कुतः फलमिहास्य।
अथवा भवितव्यानां द्वाराणि भवन्ति सवित्र॥

(ख) सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

(ग) अनाघ्रातं पुष्पं किसलयमलूनं कररुहै–
रनाविद्धंरत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥

(घ) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा॥

(ङ) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तरसौहृदानि॥

अथवा

अधोलिखितेषु विषयत्रयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टिप्पणी लिख्यताम्। 5×3 = 15

सूत्रधारः, विष्कम्भकः, मारीचः, सर्वदमनः, धनमित्रः, करभकः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY "10 K.N.C Road, Barasat, Kol-124"

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2020, held in 2021

## SANACOR06T-SANSKRIT (CC6)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छमेकः प्रश्नः समाधेयः। $10\times1 = 10$

(क) गद्यकाव्यं कतिविधम् ? सलक्षणं व्याख्यायताम्।

(ख) दृश्यकाव्यं नाम किम् ? दृश्यकाव्यं कतिविधम् ? यथेच्छमेकं सलक्षणं व्याख्यायताम्।

(ग) साहित्यदर्पणानुसारं महाकाव्यलक्षणं लिखित्वा उदाहरणमुखेन व्याख्या कार्या।

### ख-विभागः

2. अधोनिर्दिष्टेषु प्रश्नेषु यथेच्छमेकः प्रश्नः संस्कृतभाषया देबनागरीलिप्या च समाधेयः। $10\times1 = 10$

(क) का नाम व्यञ्जना ? काव्यप्रकाशानुसारं सोदाहरणं व्याख्यायताम्।

(ख) क उत्पत्तिवादस्य प्रवर्तकः ? काव्यप्रकाशानुसारम् उत्पत्तिवादं वर्णयत।

(ग) काव्यप्रकाशानुसारं सोदाहरणं भुक्तिवादं वर्णयत।

### ग-विभागः

3. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। $2\times5 = 10$

(क) शार्दूलविक्रीडतमिति छन्दसः कुत्र कुत्र यतिर्भवति ?

(ख) छन्दोमञ्जरीग्रन्थस्य रचयिता कः ? छन्दः कतिविधम् ?

(ग) उपजातिच्छन्दसि कति अक्षराणि सन्ति? अस्य छन्दसः किं लक्षणम् ?

(घ) का नाम उपमा ? अस्याः कति भेदाः सन्ति ?

(ङ) विभावनालंकारस्य उदाहरणं लेख्यम्।

(च) अपहनुत्यलंकारस्य लक्षणं किम् ?

(छ) श्लेषालंकारस्य भेदा नामग्राहमुल्लिख्यन्ताम्।

BARASAT GOVT COLLEGE LIBRARY

## घ-विभागः

4. अधोलिखितेषु चतुर्णां संस्कृतेन देवनागरीलिप्या च उत्तरं लेख्यम् – 5×4 = 20

(क) 'उपेन्द्रवज्रा प्रथमे लघौ सा' – व्याख्यायताम्।

(ख) स्रग्धराछन्दसः सोदाहरणं लक्षणं व्याख्यायताम्।

(ग) मालिनीछन्दसः सोदाहरणं लक्षणं व्याख्यायताम्।

(घ) 'नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्।
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः॥'–
श्लोकान्तर्गतस्य अलङ्कारस्य लक्षणं लिखित्वा सङ्गतिः प्रदर्शनीया।

(ङ) सन्देहालङ्कारस्य सोदाहरणं लक्षणं व्याख्येयम्।

(च) दृष्टान्तनिदर्शनयोः भेदः सोदाहरणं पर्यालोचनीयः।

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE LIBRARY 10 K.N.C. Road, Barasat, Kol-124

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2020, held in 2021

## SANACOR07T-SANSKRIT (CC7)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः

1. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतेन देवनागरलिप्या च लघुबन्धो विरच्यताम्। 5×1 = 5

(क) सूत्रसाहित्येषु प्रतिविम्बिता समाजव्यवस्था।

(ख) भारतीयसमाजपरिवर्तने जैनानां प्रभावः।

अथवा

अधो लिखितेषु श्लोकेषु यथेच्छमेकः संस्कृतेन देवनागरलिप्या च व्याख्येयः। 5×1 = 5

(क) वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्॥

(ख) अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः॥

2. अधः प्रदत्तेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतभाषया देवनागरलिप्या च समाधेयाः। 2×5 = 10

(क) याज्ञवल्क्यनये किं धर्ममूलम् ?

(ख) मिताक्षरायां धर्मशब्दस्य कोऽर्थो निरूपितः ? अस्याः टीकायाः कः रचयिता ?

(ग) को निमित्तधर्मः ? को वा साधारणधर्मः ?

(घ) 'दशकं धर्मलक्षणम्'– इत्यत्र दशकमिति पदस्य कोऽर्थः ?

(ङ) धर्मस्य कति स्थानानि ? कानि च तानि ?

(च) पुराणस्य लक्षणं किम् ? कति महापुराणानि सन्ति ?

(छ) सूत्रसाहित्यं कतिविधम् ? कानि च तानि ?

### ख-विभागः

3. यथेच्छमेकः प्रश्नः संस्कृतेन देवनागरलिप्या च समाधेयः। 10×1 = 10

(क) महाभारते स्त्रीणां यादृशी स्थितिर्दृश्यते भवत्पाठ्यानुसारं सा वर्णनीया।

(ख) संस्कारपदेन किं ज्ञायते ? कति संस्काराः ? भारतीयानां सामाजिकजीवनेषु तेषां संस्काराणामुपयोगोऽस्ति न वेति विचार्यताम्।

BARASAT GOVT COLLEGE LIBRARY "10 K N C Road, Barasat, Kol-124"

4. प्रसङ्गोल्लेखपूर्वकं यथेच्छमेकस्य संस्कृतेन देवनागरलिप्या च व्याख्या कार्या। 5×1 = 5

(क) चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥

(ख) धर्मचर्यया जघन्यो वर्णः पूर्वं पूर्वं वर्णमापद्यते जातिपरिवृत्तौ॥

अथवा

अधोलिखितेषु यथेच्छमेकमाश्रित्य टिप्पनी लेख्या। 5×1 = 5

(क) आश्रमचतुष्टयम्, (ख) सीमन्तोन्नयनम्, (ग) चूडाकरणम्।

## ग-विभागः

5. यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) महाभारतस्य शान्तिपर्वणि वर्णितस्य पितामहभीष्मस्य युधिष्ठिरं प्रति धर्मार्थकामविषयात्मकस्य उपदेशस्य विवरणं देयम्।

(ख) शुक्रनीत्यनुसारेण नीतिशास्त्रस्य श्रेष्ठत्वं प्रतिपाद्यताम्।

6. यथेच्छं विषयद्वयमाश्रित्य संस्कृतेन देवनागरलिप्या च टीकां लिखत। 5×2 = 10

(क) जनपदः, (ख) रत्नी, (ग) वृजिः, (घ) विश्पतिः।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छं द्वयं प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरलिप्या च व्याख्येयम्। 5×2 = 10

(क) श्रेष्ठा बुद्धिस्त्रिवर्गस्य यदयं प्राप्नुयान्नरः।
कर्मणा बुद्धिपूर्वेण भवत्यर्थी न वा पुनः॥

(ख) नान्यान् दहति स्नेहाग्निर्दहत्यात्मानमेव हि।
स्वयं तु दूयमानोऽपि परांस्तु न दूनोति सः॥

(ग) अराजके हि लोकेऽस्मिन् सर्वतो विद्रुते भयात्।
रक्षार्थमस्य सर्वस्य राजानमसृजत् प्रभुः॥

**N.B. :** *Students have to complete submission of their Answer Scripts through E-mail / Whatsapp to their own respective colleges on the same day / date of examination within 1 hour after end of exam. University / College authorities will not be held responsible for wrong submission (at in proper address). Students are strongly advised not to submit multiple copies of the same answer script.*

——×——

BARASAT GOVT COLLEGE "10 K N C Road, Barasat, Kol-124" LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2019

## SANACOR05T-SANSKRIT (CC5)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम्। 10

(क) भासकृते 'स्वप्नवासवदत्तमि'ति नाटके यौगन्धरायणचरित्रस्य उपयोगिता लिख्यताम्।

(ख) भासविरचितस्य 'स्वप्नवासवदत्तमि'ति नाटकस्य नामकरणस्य यौक्तिकता विशदीक्रियताम्।

2. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत – 5

(क) सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्॥

(ख) गुणानां वा विशालानां सत्काराणां च नित्यशः।
कर्तारः सुलभाः लोके विज्ञातारस्तु दुर्लभाः॥

3. अधोलिखितेषु पञ्च प्रश्नाः संस्कृतभाषया देवनागरीलिप्या च समाधेयाः। 2×5 = 10

(क) अङ्गारवती का आसीत् ? केन सा परिणीता ?

(ख) उदयनस्य वीणायाः नाम किम् ? कस्मात् सः तां प्राप्तवान् ?

(ग) महासेनः कः आसीत् ? कथं सः महासेन इति कथितः ?

(घ) स्वप्नवासवदत्तमिति नाटकस्य भरतवाक्यं किम् ?

(ङ) कः आसीत् रुमण्वान् ? कस्य नामासीत् वसन्तकः ?

(च) न्यासः नाम कः ? केन कः न्यासरुपेण निक्षिप्तः ?

(छ) स्वप्नवासवदत्त नाटके प्रयुक्तेषु वृत्तेषु कयोश्चित् द्वयोः नामनी लिख्येताम्।

(ज) यौगन्धरायणः कः आसीत् ? स्वप्नवासवदत्तमिति नाटके मगधराजस्य नाम किम् ?

### SECTION-B

4. यथाभिमतं प्रश्नस्य एकस्योत्तरं प्रदेयम्। 10

(क) शकुन्तलां प्रति दुर्वाससः शापः कः आसीत् ? अभिज्ञानशकुन्तलम्नाटकस्य क्रमविकाशे तस्य शापस्य उपयोगिता प्रदर्श्यताम्।

(ख) "उपमा कालिदासस्य" अभिज्ञानशकुन्तलमाश्रित्य सोदाहरणम् इत्युक्तिः विशद्यताम्।

BARASAT GOVT COLLEGE LIBRARY 10 K N C Road, Barasat, Kol-124

5. अधोलिखितेषु श्लोकेषु त्रयाणां संस्कृतेन देवनागरीलिप्या च व्याख्यां कुरुत – 5×3 = 15

(क) आ परितोषाद् विदुषां न साधु मन्ये प्रयोगविज्ञानम्।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः॥

(ख) इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति॥

(ग) चित्रे निवेश्य परिकल्पितसत्त्वयोगा
रुपोच्चयेन मनसा विधिना कृता नु।
स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे
धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः॥

(घ) लभेत वा प्रार्थयिता न वा श्रियम्।
श्रिया दुरापः कथमीप्सितो भवेत्॥

(ङ) त्वमर्हतां प्राग्रसरः स्मृतोऽसि नः
शकुन्तला मूर्तिमती च सत्क्रिया।
समानयंस्तुल्यगुणं वधूवरं
चिरस्य वाच्यं न गतः प्रजापतिः॥

(च) स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत् फलमेव पुण्यम्।
असन्निवृत्त्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः॥

अथवा

अधोलिखितेषु विषयत्रयमवलम्ब्य टिप्पणी लिख्यताम्। 5×3 = 15

(i) नान्दी, (ii) कुलपतिः, (iii) माधव्यः, (iv) सानुमती, (v) प्रियंवदा, (vi) कण्वशिष्यः।

——×——

BARASAT GOVT COLLEGE "10 K N C Road, Barasat, Kol-124" LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2019

## SANACOR06T-SANSKRIT (CC6)

## POETICS AND LITERARY CRITICISM

Time Allotted: 2 Hours — Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### क-विभागः

1. अधोलिखितेषु प्रश्नेषु यथेच्छमेकः प्रश्नः समाधेयः। — 10×1 = 10

(क) साहित्यदर्पणानुसारं महाकाव्यस्य लक्षणं वैशद्येन विवृणुत।

(ख) कथाकाव्यस्य किं लक्षणम् ? कथाख्यायिकयोः वैसादृश्यं साहित्यदर्पणानुसारं प्रतिपाद्यताम्।

(ग) चम्पूकाव्यस्य किं लक्षणम् ? चम्पूकाव्यस्य एकमुदाहरणं प्रदाय तत्र लक्षणसङ्गतिं साधयत।

### ख-विभागः

2. अधोनिर्दिष्टेषु प्रश्नेषु यथेच्छमेकः प्रश्नः संस्कृतभाषया देवनागरीलिप्या च समाधेयः। — 10×1 = 10

(क) का नाम लक्षणा ? काव्यप्रकाशानुसारं शुद्धलक्षणायाः भेदमुदाहरणं च समासेन विवृणुत।

(ख) कः उत्पत्तिवादस्य प्रवर्तकः ? काव्यप्रकाशानुसारं सोदाहरणमुत्पत्तिवादं लिखत।

(ग) अनुमितिवादस्य कः प्रवर्तकः ? अनुमितिवादेन सह उत्पत्तिवादस्य सादृश्यं वैसादृश्यं च व्याख्यायताम्।

### ग-विभागः

3. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। — 2×5 = 10

(क) अलंकारशब्दस्य कोऽर्थः ? मुख्यतोऽस्य कति विभागाः सन्ति ?

(ख) उपमालंकारस्य किं लक्षणम् ? अस्य एकमुदाहरणं प्रदीयताम्।

(ग) को नाम श्लेषालङ्कारः ? अस्य कति भेदाः सन्ति ?

(घ) उत्प्रेक्षालंकारे 'सम्भावना' शब्दस्य कोऽर्थः ?

(ङ) छन्दोमञ्जरीग्रन्थस्य रचयिता कः ? छन्दः कतिविधम् ?

(च) उपजातिछन्दसि कति अक्षराणि सन्ति ? अस्य छन्दसः किं लक्षणम् ?

(छ) मन्दाक्रान्ताछन्दसि कुत्र कुत्र यतिर्भवति ? एकमुदाहरणं प्रदीयताम्।

### घ-विभागः

4. अधोलिखितेषु चतुर्णां संस्कृतेन देवनागरीलिप्या च उत्तरं लेख्यम् – — 5×4 = 20

(क) इन्द्रवज्रा – इति छन्दसः लक्षणंमुदाहरणं च दीयताम्।

(ख) यमकः – इत्यस्य लक्षणमुदाहरणं च दीयताम्।

(ग) मालिनी – इति छन्दसः लक्षणंमुदाहरणं च लिख्यताम्।

(घ) व्रद तोटकमब्धि सकारयुतम् – व्याख्या कार्या।

(ङ) उपेन्द्रवज्रा प्रथमे लघौ सा – व्याख्या कार्या।

(च) साम्यं वाच्यमवैधर्म्यं वाक्यैक उपमाद्वयोः – व्याख्या कार्या।

——×——

BARASAT GOVT COLLEGE LIBRARY

# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2019

## SANACOR07T-SANSKRIT (CC7)

### INDIAN SOCIAL INSTITUTIONS AND POLITY

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

क-विभागः

1. अधोलिखितेषु विषयेषु यथेच्छमेकमाश्रित्य संस्कृतेन देवनागरीलिप्या च लघुबन्धो विरच्यताम्। $5\times1=5$

(क) ऋग्वेदीय-समाजव्यवस्था, (ख) भारतीयसमाजेषु बौद्धानां प्रभावः।

अथवा

अधोलिखितेषु श्लोकेषु यथेच्छमेकः संस्कृतेन देवनागरीलिप्या च व्याख्येयः।

(क) पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥

(ख) धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥

2. अधोलिखितेषु प्रश्नेषु यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। $2\times5=10$

(क) को नाम धर्मः ? मनुसंहितायां धर्मस्य कति लक्षणानि सन्ति ?

(ख) याज्ञवल्क्यसंहितायाः आचाराध्याये कति धर्माः प्रतिपादिताः ? के च ते ?

(ग) वेदाङ्गानि कतिविधानि ? कानि च तानि ?

(घ) मिताक्षरा केन विरचिता ? मनुसंहितायाः कस्यचित् टीकाकारस्य नाम इष्यते।

(ङ) अभिलेख इति कीदृशः पदार्थः ? अस्य आङ्गलपर्यायः दीयताम्।

(च) को नाम 'दमः' ? 'अस्तेयं' च किम् ?

(छ) एलाहावादप्रशस्तिः केन विरचिता ? अत्र कस्य वंशस्य वर्णनं प्राप्यते ?

ख-विभागः

3. अधोदत्तेषु प्रश्नेषु यथेच्छमेकः संस्कृतेन देवनागरीलिप्या च समाधेयाः। $10\times1=10$

(क) श्रीमद्भगवद्गीतानुसारं गुणकर्माश्रितं वर्णविभाजनं कथमासीदिति वर्ण्यताम्।

(ख) बृहत्संहितायां स्त्रीप्रशंसा यथा विहिता तथा समुपस्थाप्यताम्।

4. अधः प्रदत्तयोः प्रसङ्गोल्लेखपूर्वकं यथेच्छमेकः श्लोकः संस्कृतेन देवनागरीलिप्या च व्याख्येयः। 5×1 = 5

BARASAT GOVT COLLEGE "10 K N C Road, Barasat, Kol-124" LIBRARY

(क) ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥

(ख) जात्युत्कर्षो युगे रोयः सप्तमे पञ्चमेऽपि वा।
व्यत्यये कर्मणां साम्यं पूर्ववच्चाधरोत्तरम्॥

अथवा

अधोलिखितेषु यथेच्छमेकम् आश्रित्य टिप्पनी कार्या – 5×1 = 5

(क) संस्काराः, (ख) पुरुषार्थचतुष्टयम्, (ग) समावर्तनम्।

## ग-विभागः

5. यथेच्छमेकः प्रश्नः समाधेयः। 10×1 = 10

(क) मनुसंहितानुसारं नृपस्य दैवीउत्पत्तिः वैशद्येन विव्रियताम्।

(ख) गान्धिसंमतस्य सत्याग्रहस्य स्वरूपं वर्ण्यताम्।

6. यथेच्छं विषयद्वयमाश्रित्य संस्कृतेन देवनागरीलिप्या च टिप्पणी कार्या। 5×2 = 10

(क) विदथः, (ख) परिषत्, (ग) योगक्षेमौ, (घ) मात्स्यन्यायः।

अथवा

अधः प्रदत्तेषु श्लोकेषु यथेच्छं द्वयं प्रसङ्गोल्लेखपूर्वकं संस्कृतेन देवनागरीलिप्या च व्याख्येयम्। 5×2 = 10

(क) अपध्यानमलो धर्मो मलोऽर्थस्य निगूहनम्।
सम्प्रमोदमलः कामो भूयः स्वगुणवर्जितः॥

(ख) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति॥

(ग) अभीष्टं यदि कस्यापि भवेद्रक्तप्रवाहणम्।
रक्तं स्यादात्मनस्तत्तु न परस्य कदाचन॥

——×——